JOURNAL OF MANUSCRIPT STUDIES

Volx. XXIX & XXX (Combined) 1989-90

Editor

Dr. K. Vijayan

Joint Editors

Dr. P. Visalakshy

Smt. R. Girija

Oriental Research Institute and Manuscripts Library
University of Kerala, Kariavattom, Thiruvananthapuram

आपन्निवारणस्तोत्रम् ।।

श्रीगुरुभ्यो नमः ।। हरिः ॐ ।।

नमः कोदण्डहस्ताय
संधी (धी?) कृतशराय च ।
दण्डिताखिलदैत्याय
रामायापन्निवारणे ।। १

नमः शुद्धान्तरंगाय
तारकाब्रह्ममूर्तये ।
संसारबन्धमोक्षाय
रामायापन्निवारणे ।। २

नमश्चन्द्रार्कनेत्राय
पल्लवारुणपाणये ।
विशालपद्महस्ताय
रामायापन्निवारणे ।। ३

नमः कमलदेहाय
ताटकाप्राणहारिणे ।
वारिजायतनेत्राय
रामायापन्निवारणे ।। ४

हेमकोदण्डहस्ताय
क्षेमयोगधराय च ।
कौसल्यागर्भजाताय
रामायापन्निवारणे ।। ५

नमः कोदण्डनिधयेऽ
हल्याशापनिवारणे ।
शिवलिङ्गप्रतिष्ठाय
रामायापन्निवारणे ।। ६

नमश्चंडि – – दण्डि
खण्डनाय महात्मने ।
भानुवंशप्रदीपाय
रामायापन्निवारणे ।। ७

नमः सीतासमायुक्ता–
कारश्रृङ्गारधारिणे ।
शान्तरूपायभक्तेषु
रामायापन्निवारणे ।। ८

नमोऽनमस्ते गीर्वाणं
हितमानुषरूपिणे ।
जितभार्गवरूपाय
रामायापन्निवारणे ।। ९

नमः सत्यैकनिधये
जटावल्कलधारिणे ।
पितृवाक्यानुपालाय
रामायापन्निवारणे ।। १०

नमः पादप्रयाणेन
वनान्तरचराय च ।
धनुर्धराय देवाय
रामायापन्निवारणे ।। ११

नमः कान्तारवासाय
पवित्रं पादरेणवे ।
नमः पोषितभक्ताय
रामायापन्निवारणे ।। १२

नमः शबलजाज्वल्य
नाममन्त्रैकहेतवे ।
त्रिराधप्राणहंत्रे च
रामायापन्निवारणे ॥ १३

नमः कैवल्यनाथाय
दण्डकारण्यवासिने ।
लक्ष्मणप्राणनाथाय
रामायापन्निवारणे ॥ १४

नमः कञ्जनेत्राय(च)
हारशोभितवक्षमे ।
वायुजप्राणनाथाय
रामायापन्निवारणे ॥ १५

नमः सुग्रीवनाथाय
अयोध्यापुरवासिने ।
जानकीप्राणनाथाय
रामायापन्निवारणे ॥ १६

नमः काकुत्स्थवंशाय
कौसल्यातनयाय च ।
हनुमत्सेवितपादाय
रामायापन्निवारणे ॥ १७

नमः खरशिरोहन्त्रे
कुम्भकर्णविदारणे ।
दशकण्ठशिरच्छेत्र
रामायापन्निवारणे ॥ १८

नमः संग्रामरङ्गाग्ने
प्रजल्पेश्रितभानवे ।
शान्तरूपाय भक्तेषु
रामायापन्निवारणे ।। १९

नमः सत्यस्वरूपाय
शराग्नेतलशिघवे ।
विभग्नहरचापाय
रामायापन्निवारणे ।। २०

जयतु जयतु धीरः
सर्वलोकैकवीरः ।
कुवलयदलनेत्रः
कोमलः श्यामगात्रः ।।
सरसनयनकलापः
शान्तिमन्नामभूयः ।। २१

प्रातः कालेपठेन्नित्यं
यात्राकाले विशेषतः
भयानि तस्य नश्यन्ति
सर्वत्र विजयी भवेत् । २२

इति आपन्निवारणस्तोत्रं सम्पूर्णम्

This is based on the paper Manuscript bearing the Ms. No.3482 of this Library collection.